NP – 048

4

# I Semester B.A./B.S.W./B.F.A./B.V.A. Examination, March/April 2023
## (2021 – 22 and Onwards) (NEP) (F + R)
## SANSKRIT (Paper – I)
## Sarga (Canto) of Valmiki Ramayanam
## (Grammar and Comprehension)

Time : 2½ Hours Max. Marks : 60

St Claret College Bangalore-560

***Instructions :*** *1) Answer in* ***Sanskrit, Kannada*** *or* ***English.***
*2) Main Question No.* ***1, 6*** *and* ***7*** *should be answered in* ***Sanskrit.***

I. सूक्तोत्तरचयनं कुरुत । **(8×1=8)**

Choose the correct answer :

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ :

1) आदिकाव्यम् इति प्रसिद्धं काव्यं किम् ?
A) महाभारतं B) रामायणं C) विष्णुपुराणं D) रघुवंशम्

2) श्रीमद्-रामायणं केन विरचितम् ?
A) व्यासेन B) भासेन C) वाल्मीकिना D) कालिदासेन

3) इक्ष्वाकुवंशप्रभव: क: ?
A) श्रीराम: B) युधिष्ठिर: C) धृतराष्ट: D) पाण्डु:

4) श्रीरामेण सह क: वनम् अगच्छत् ?
A) भरत: B) लक्ष्मण: C) शत्रुघ्न: D) दशरथ:

5) सीता कस्य पुत्री ?
A) दशरथस्य B) शिवस्य C) जनकस्य D) श्रीरामस्य

6) निषादाधिपति: क: ?
A) एकलव्य: B) गुह: C) वाल्मीकि: D) भरत:

7) 'समुद्र इव गम्भीर:' क: ?
A) दशरथ: B) भरत: C) लक्ष्मण: D) श्रीराम:

8) सप्त काण्डा: कस्मिन् काव्ये सन्ति ?
A) महाभारते B) रामायणे C) रघुवंशे D) कुमारसम्भवे

II. **द्वयो: एकस्य** प्रबन्धरूपेण उत्तरं लिखत : (1×8=8)

Write an essay on **any one** of two:

ಯಾವುದಾದರೂ **ಒಂದನ್ನು** ಕುರಿತು ಪ್ರಬಂಧ ರೂಪದಲ್ಲಿ ಉತ್ತರಿಸಿ :

1) श्रीरामस्य पात्रचित्रणं कुरुत ।

Sketch the character of Srirama.

ಶ್ರೀರಾಮನ ಪಾತ್ರ ಚಿತ್ರಣವನ್ನು ಮಾಡಿ.

2) वाल्मीकि मुने: देश-काल-कृतय: ।

Place – date – works of Valmiki.

ವಾಲ್ಮೀಕಿ ಮುನಿಯ ದೇಶ-ಕಾಲ-ಕೃತಿಗಳು.

III. **द्वयो:** लघुटिप्पणीं लिखत : (2×4=8)

Write short notes on **any two** :

ಯಾವುದಾದರೂ **ಎರಡನ್ನು** ಕುರಿತು ಲಘು ಟಿಪ್ಪಣಿಯನ್ನು ಬರೆಯಿರಿ.

1) रामायणम् ।

2) सीता ।

3) श्रीराम: ।

4) नारद: ।

IV. **चतुर्णां** श्लोकानाम् अनुवादं कृत्वा भावं विशदयत : (4×3=12)

Translate and explain **any four** stanzas :

**ನಾಲ್ಕು** ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ, ಭಾವವನ್ನು ವಿವರಿಸಿ.

1) तप:स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ।।

2) इक्ष्वाकुवंशप्रभवो रामो नाम जनै: श्रुत: ।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ।।

3) धर्मज्ञ: सत्यसन्धश्च प्रजानांचहिते रत: ।
यशस्वी ज्ञानसम्पन्न: शुचिर्वश्य: समाधिमान् ।।

4) स जगाम वनं वीरः प्रतिज्ञामनुपालयन् ।
पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणात् ।।

5) चित्रकूटङ्गते रामे पुत्रशोकातुरस्तथा ।
राजा दशरथस्स्वर्गं जगाम विलपन् सुतम् ।।

6) वसतस्तस्य रामस्य वने वनचरैः सह ।
ऋषयोऽभ्यागमन् सर्वे वधायासुर-रक्षसाम् ।।

V. **द्वयोः** सन्दर्भं विवृणुत : **(2×3=6)**

Explain **any two** with the reference and context :

ಯಾವುದಾದರೂ **ಎರಡನ್ನು** ಕುರಿತು ಸಂದರ್ಭಸಹಿತ ವಿವರಿಸಿ.

1) प्रहृष्टो वाक्यमब्रवीत् ।

2) कम्बुग्रीवो महाहनुः ।

3) सदैव प्रियदर्शनः ।

4) ततो भरतं भरताग्रजः ।

VI. **संस्कृत** भाषया उत्तराणि लिखत ।

अ) **संस्कृतेन** वाक्यं रचयत। (**पञ्चानाम्**) : **(5×1=5)**

1) तेन

2) रामः

3) यत्र–तत्र

4) किमर्थम्

5) सह

6) दशरथस्य

7) बहिः

8) गच्छति

आ) लिङ्ग-विभक्ति-वचनानि लिखत । (**पञ्चानाम्**) : **(5×1=5)**

1) रामम्
2) सीतायां
3) रावणेन
4) पित्रा
5) राज्यं
6) स:
7) तेभ्य:
8) तासु

VII. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तरं लिखत । **(4×2=8)**

पुरा अयोध्यायां सगरो नाम राजा आसीत् । एकदा स: अश्वमेधयागं कर्तुम् ऐच्छत् । तदर्थं स: यज्ञाश्वम् अमुञ्चत् । इमं विषयं ज्ञात्वा, देवेन्द्र: यज्ञाश्वम् अपहृतवान् । तं पातालं नीत्वा तत्र तप: कुर्वत: कपिलमुने: समीपे स्थापितवान् । यज्ञाश्वम् अन्विषन्त: सगरपुत्रा: भूमिं खनन्त: पातालम् अगच्छन् । तत्र यज्ञाश्वं दृष्ट्वा कपिल एव चोर इति मत्वा, ते तं महामुनि: अवाच्यशब्दै: अनिन्दन् । तदा कुपितो मुनि: नेत्रे उन्मील्य तान् सर्वान् भस्मीकृतवान् । अत: ज्येष्ठा: वदन्ति 'अविचार्य किमपि कर्म न करणीयम्' इति ।

**प्रश्ना:**

1) सगरो नाम राजा कुत्र आसीत् ?
2) राजा सगर: किं कर्तुम् ऐच्छत् ?
3) सगरस्य यज्ञाश्वं क: अपहृतवान् ?
4) कुपितो मुनि: किम् अकरोत् ?

---